तुत्थः, तुतुत्थयिषः ; तुत्थयितुम्, तुतुत्थयिषितुम् ;
तुत्थना, तुतुत्थयिषा ; तुत्थनम्, तुतुत्थयिषणम् ;
तुत्थयित्वा, तुतुत्थयिषित्वा ; प्रतुत्थ्य, प्रतुतुत्थयिष्य ;
तुत्थम् २, } तुतुत्थयिषम् २ ; }
तुत्थयित्वा २, } तुतुत्थयिषित्वा २. }

## (741) "तुद व्यथने" (VI-तुदादिः-1281. सक. अनि. उभ.)

तोदकः-दिका, तोदकः-दिका, [1]तुतुत्सकः-त्सिका, तोतुदकः-दिका ;
तोत्ता-त्री, तोदयिता-त्री, तुतुत्सिता-त्री, तोतुदिता-त्री ;
[A]तुदन्-न्ती-ती, तोदयन्-न्ती, तुतुत्सन्-न्ती ; —
तोत्स्यन्-न्ती-ती, तोदयिष्यन्-न्ती-ती, तुतुत्सिष्यन्-न्ती-ती ; —
तुदमानः, तोदयमानः, तुतुत्समानः, तोतुद्यमानः ;
तोत्स्यमानः, तोदयिष्यमाणः, तुतुत्सिष्यमाणः, तोतुदिष्यमाणः ;
तुत्-तुद्-तुदौ-तुदः ; — — —
[2]तुन्नम्-तुन्नः-तुन्नवान्, तोदितः, तुतुत्सितः, तोतुदितः-तवान् ;
तुदः, [3]विधुन्तुदः[B]-[C]अरुन्तुदः-[4]तिलन्तुदः, तोदः, तुतुत्सुः, तोतुदः ;
तोत्तव्यम्, तोदयितव्यम्, तुतुत्सितव्यम्, तोतुदितव्यम् ;
तोदनीयम्, तोदनीयम्, तुतुत्सनीयम्, तोतुदनीयम् ;

---

1. 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वम्। तेनाङ्गस्य गुणो न। एवं सन्नन्ते सर्वत्र ज्ञेयम्।
2. 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' (8-2-42) इति निष्ठानत्वम्।
3. 'विध्वरुषोस्तुदः' (3-2-35) इति खश्प्रत्ययः। 'अरुर्द्विषदजन्तस्य मुम्' (6-3-67) इति मुम्। **विधुन्तुदः**=राहुः। 'संयोगान्तस्य लोपः' (8-2-23) इति अरुषः सकारस्य लोपः। अरुः=मर्म तुदति=व्यथतीति **अरुन्तुदः**= मर्मवित्।
4. 'वातशुनीतिलशर्धेषु अजधेट्तुदजहातीनामुपसंख्यानम्' (वा. 3-2-28) इति खश्। 'अरुर्द्विषदजन्तस्य—' (6-3-67) इति मुमागमः। **तिलन्तुदः**= वणिजां तैलनिष्पादकं दारु।

A. '**तुदन्** कुचरितान् शुभे प्रणुदमान इष्टं दिशन्
प्रमृष्टपललान् क्षिपन् अरिमतिं कृषन् माधवः।' धा. का. 2.72.

B. 'अथ मुहुर्बहुनिन्दितचन्द्रया स्तुतविधुन्तुदया च तया बहु।' नैषधे. 4. 43.

C. '**अरुन्तुदम्**इवालानमनिर्वाणस्य दन्तिनः॥' रघुवंशे 1.71.